# sItAsahasranAmastotram from bhuShuNDirAmAya

# સીતાસહસ્રનામસ્તોત્રમ્ ભુષુણ્ડિરામાયણાન્તર્ગતમ્

## Document Information

Text title : sItAsahasranAmastotram 2 from bhushuNDIrAmAyaNa

File name : sItAsahasranAmastotrambhushuNDIrAmAyaNa.itx

Category : raama, sahasranAma, devii, sItA, devI

Location : doc_raama

Proofread by : Pallasena Narayanaswami ppnswami at gmail.com

Source : Bhushundi Ramayanam pUrvakhaNDa, adhyAYa 14

Latest update : August 11, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 11, 2020

*sanskritdocuments.org*

# સીતાસહસ્રનામસ્તોત્રમ્ ભુષુણ્ડિરામાયણાન્તર્ગતમ્

ચતર્દશોઽધ્યાયઃ ।
વસિષ્ઠ ઉવાચ -
યા શ્રીરેતસ્ય સહજા સીતા નિત્યાઙ્ગસઙ્ગિનો ।
ભવિત્રી જનકસ્યૈવ કુલે સર્વાઙ્ગસુન્દરી ॥ ૧॥

તસ્યાશ્ચ નામસાહસ્રં કથયિષ્યામિ ભૂપતે ।
યથા રામસ્તથૈવેયં મહાલક્ષ્મીઃ સનાતની ॥ ૨॥

નાનયોઃ સંમતો ભેદઃ શાસ્ત્રકોટિશતૈરપિ ।
અસ્યૈવ નિત્યરમણો બહુનામસ્વરૂપતઃ ॥ ૩॥

તસ્યાસ્તુ નામસાહસ્રં યથાવદુપધારય ।
અં સહજાનન્દિની સીતા જાનકી રાધિકા રતિઃ ॥ ૪॥

રુક્મિણી કમલા કાન્તા કાન્તિઃ કમલલોચના ।
કિશોરી રામલલના કામુકી કરુણાનિધિઃ ॥ ૫॥

કન્દર્પવદ્ધિની વીરા વરુણાલયવાસિનો ।
અશોકવનમધ્યસ્થા મહાશોકવિનાશિની ॥ ૬॥

ચમ્પકાઙ્ગી તડિત્કાન્તિર્જાહ્નવી જનકાત્મજા ।
જાનકી જયદા જપ્યા જયિની જૈત્રપાલિકા ॥ ૭॥

પરમા પરમાનન્દા પૂણિમામૃતસાગરા ।
સૂધાસૂતિઃ સુધારશ્મિઃ સુધાદીપિતવિગ્રહા ॥ ૮॥

સુસ્મિતા સુસ્મિતમુખી તારકા સુખદેક્ષણા ।
રક્ષણી ચિત્રકૂટસ્થા વૃન્દાવનમહેશ્વરી ॥ ૯॥

કન્દર્પકોટિજનની કોટિબ્રહ્માણ્ડનાયિકા ।
શરણ્યા શારદા શ્રીશ્ચ શરત્કાલવિનોદિની ॥ ૧૦॥

હંસી ક્ષીરાબ્ધિવસતિર્વાસુકી સ્થાવરાઙ્ગના ।
વરાઙ્ગાસનસંસ્થાના પ્રિયભોગવિશારદા ॥ ૧૧॥

વસિષ્ઠવિશ્વવસિની વિશ્વપત્ની ગુણોદયા ।
ગૌરી ચમ્પકગાત્રા ચ દીપદ્યોતા પ્રભાવતી ॥ ૧૨॥

રત્નમાલાવિભૂષા ચ દિવ્યગોપાલકન્યકા ।
સત્યભામારતિઃ પ્રીતા મિત્રા ચિત્તવિનોદિની ॥ ૧૩॥

સુમિત્રા ચૈવ કૌશલ્યા કૈકેયીકુલવર્દ્ધિની ।
કુલીના કેલિની દક્ષા દક્ષકન્યા દયાવતી ॥ ૧૪॥

પાર્વતી શૈલકુલજા વંશધ્વજપટીરુચિઃ ।
રુચિરા રુચિરાપાઙ્ગા પૂર્ણરૂપા કલાવતી ॥ ૧૫॥

કોટિબ્રહ્માણ્ડલક્ષ્મીશા સ્થાનદાત્રી સ્થિતિઃ સતી ।
અમૃતા મોદિની મોદા રત્નાચલવિહારિણી ॥ ૧૬॥

નન્દભાનુસુતા ધીરા વંશીરવવિનોદિની ।
વિજયા વીજિની વિદ્યા વિદ્યાદાનપરાયણા ॥ ૧૭॥

મન્દસ્મિતા મન્દગતિર્મદના મદનાતુરા ।
વૃંહિણી વૃહતી વર્યા વરણીયા વરાઙ્ગના ॥ ૧૮॥

રામપ્રિયા રમારૂપા રાસનૃત્યવિશારદા ।
ગાન્ધર્વિકા ગીતરમ્યા સઙ્ગીતરસવર્દ્ધિની ॥ ૧૯॥

તાલદા તાલવક્ષોજા તાલભેદનસુન્દરી ।
સરયૂતીરસન્તુષ્ટા યમુનાતટસંસ્થિતા ॥ ૨૦॥

સ્વામિની સ્વામિનિરતા કૌસુમ્ભવસનાવૃતા ।
માલિની તુઙ્ગવક્ષોજા ફલિની ફલમાલિની ॥ ૨૧॥

વૈડૂર્યહારસુભગા મુક્તાહારમનોહરા ।
કિરાતીવેશસંસ્થાના ગુઞ્જામણિવિભૂષણા ॥ ૨૨॥

વિભૂતિદા વિભા વીણા વીણાનાદવિનોદિની ।
પ્રિયઙ્ગુકલિકાપાઙ્ગા કટાક્ષા ગતિતોષિતા ॥ ૨૩॥

રામાનુરાગનિલયા રત્નપઙ્કજમાલિની ।
વિભાવા વિનયસ્થા ચ મધુરા પતિસેવિતા ॥ ૨૪॥

શત્રુઘ્નવરદાત્રી ચ રાવણપ્રાણમોચિની ।   var  મોક્ષિણી
દણ્ડકાવનમધ્યસ્થા બહુલીલા વિલાસિની ॥ ૨૫॥

શુક્લપક્ષપ્રિયા શુક્લા શુક્લાપાઙ્ગસ્વરોન્મુખી ।
કોકિલસ્વરકણ્ઠી ચ કોકિલસ્વરગાયિની ॥ ૨૬॥

પઞ્ચમસ્વરસન્તુષ્ટા પઞ્ચવક્ત્રપ્રપૂજિતા ।
આદ્યા ગુણમયી લક્ષ્મીઃ પદ્મહસ્તા હરિપ્રિયા ॥ ૨૭॥

હરિણી હરિણાક્ષી ચ ચકોરાક્ષી કિશોરિકા ।
ગુણહૃષ્ટા શરજ્જ્યોત્સ્ના સ્મિતસ્નપિતવિગ્રહા ॥ ૨૮॥

વિરજા સિન્ધુગમની ગઙ્ગાસાગરયોગિની ।
કપિલાશ્રમસંસ્થાના યોગિની પરમાકલા ॥ ૨૯॥

ખેચરો ભૂચરી સિદ્ધા વૈષ્ણવી વૈષ્ણવપ્રિયા ।
બ્રાહ્મી માહેશ્વરી તિગ્મા દુર્વારબલવિભ્રમા ॥ ૩૦॥

રક્તાંશુકપ્રિયા રક્તા નવવિદ્રુમહારિણી ।
હરિપ્રિયા હ્રીસ્વરૂપા હીનભક્તવિવર્દ્ધિની ॥ ૩૧॥

હિતાહિતગતિજ્ઞા ચ માધવી માધવપ્રિયા ।
મનોજ્ઞા મદનોન્મત્તા મદમાત્સર્યનાશિની ॥ ૩૨॥

નિઃસપત્નો નિરુપમા સ્વાધીનપતિકા પરા ।
પ્રેમપૂર્ણા સપ્રણયા જનકોત્સવદાયિની ॥ ૩૩॥

વેદિમધ્યા વેદિજાતા ત્રિવેદી વેદભારતો ।
ગીર્વાણગુરુપત્ની ચ નક્ષત્રકુલમાલિની ॥ ૩૪॥

મન્દારપુષ્પસ્તવકા મન્દાક્ષનયવર્દ્ધિની ।
સુભગા શુભરૂપા ચ સુભાગ્યા ભાગ્યવર્દ્ધિની ॥ ૩૫॥

સિન્દૂરાઙ્કિતમાલા ચ મલ્લિકાદામભૂષિતા ।
તુઙ્ગસ્તની તુઙ્ગનાસા વિશાલાક્ષી વિશલ્યકા ॥ ૩૬॥

કલ્યાણિની કલ્મષહા કૃપાપૂર્ણા કૃપાનદી ।
ક્રિયાવતી વેધવતી મન્ત્રણી મન્ત્રનાયિકા ॥ ૩૭॥

કૈશોરવેશસુભગા રઘુવંશવિવદ્ધિની ।

રાઘવેન્દ્રપ્રણયિની રાઘવેન્દ્રવિલાસિની ॥ ૩૮॥

તરુણી તિગ્મદા તન્વી ત્રાણા તારુણ્યવર્દ્ધિની ।
મનસ્વિની મહામોદા મીનાક્ષી માનિની મનુઃ ॥ ૩૯॥

આગ્નેયીન્દ્રાણિકા રૌદ્રી વારુણી વશવર્તિની । var અગ્રાહ્યી વારુણી
વીતરાગા વીતરતિર્વીતશોકા વરોરુકા ॥ ૪૦॥

વરદા વરસંસેવ્યા વરજ્ઞા વરકાઙ્ક્ષિણી ।
ફુલ્લેન્દીવરદામા ચ વૃન્દા વૃન્દાવતી પ્રિયા ॥ ૪૧॥

તુલસીપુષ્પસંકાશા તુલસીમાલ્યભૂષિતા ।
તુલસીવનસંસ્થાના તુલસીવનમન્દિરા ॥ ૪૨॥

સર્વાકારા નિરાકારા રૂપલાવણ્યવર્દ્ધિની । var નિત્યાકારા
રૂપિણી રૂપિકા રમ્યા રમણીયા રમાત્મિકા ॥ ૪૩॥

વૈકુણ્ઠપતિપત્ની ચ વૈકુણ્ઠપ્રિયવાસિની ।
વદ્રિકાશ્રમસંસ્થા ચ સર્વસૌભાગ્યમણ્ડિતા ॥ ૪૪॥

સર્વવેદાન્તગમ્યા ચ નિષ્કલા પરમાકલા ।
કલાભાસા તુરીયા ચ તુરીયાશ્રમમણ્ડિતા ॥ ૪૫॥

રક્તોષ્ઠી ચ પ્રિયા રામા રાગિની રાગવર્દ્ધિની ।
નીલાંશુકપરીધાના સુવર્ણકલિકાકૃતિઃ ॥ ૪૬॥

કામકેલિવિનોદા ચ સુરતાનન્દવર્દ્ધિની ।
સાવિત્રી વ્રતધર્ત્રી ચ કરામલકનાયકા ॥ ૪૭॥ var વ્રતધાત્રી

મરાલા મોદિની પ્રાજ્ઞા પ્રભા પ્રાણપ્રિયા પરા ।
પુનાના પુણ્યરૂપા ચ પુણ્યદા પૂર્ણિમાત્મિકા ॥ ૪૮॥

પૂર્ણાકારા વ્રજાનન્દા વ્રજવાસા વ્રજેશ્વરી ।
વ્રજરાજસુતાધારા ધારાપીયૂષવર્ષિણી ॥ ૪૯॥

રાકાપતિમુખી મગ્ના મધુસૂદનવલ્લભા ।
વીરિણી વીરપત્ની ચ વીરચારિત્રવર્દ્ધિની ॥ ૫૦॥

ધમ્મિલ્લમલ્લિકાપુષ્પા માધુરી લલિતાલયા ।
વાસન્તી વર્હભૂષા ચ વર્હોત્તંસા વિલાસિની ॥ ૫૧॥

બર્હિણી બહુદા બહ્વી બાહુવલ્લી મૃણાલિકા ।
શુકનાસા શુદ્ધરૂપા ગિરીશવરવર્દ્ધિતા ॥ ૫૧॥

નન્દિની ચ સુદન્તા ચ વસુધા ચિત્તનન્દિની ।
હેમસિહાસનસ્થાના ચામરદ્વયવીજિતા ॥ ૫૨॥

છત્રિણી છત્રરમ્યા ચ મહાસામ્રાજ્યસર્વદા ।
સંપન્નદા ભવાની ચ ભવભીતિવિનાશિની ॥ ૫૪॥

દ્રાવિડી દ્રવિડસ્થાના આન્ધ્રી કાર્ણાટનાગરી ।
મહારાષ્ટ્રૈકવિષયા ઉદગ્દેશનિવાસિની ॥ ૫૫॥

સુજઙ્ઘા પઙ્કજપદા ગુપ્તગુલ્ફા ગુરુપ્રિયા ।
રક્તકાઞ્ચીગુણકટિઃ સુરૂપા બહુરૂપિણી ॥ ૫૬॥

સુમધ્યા તરુણશ્રીશ્ચ વલિત્રયવિભૂષિતા ।
ગર્વિણી ગુર્વિણી સીતા સીતાપાઙ્ગવિભોચની ॥ ૫૭॥

તાટઙ્કિની કુન્તલિની હારિણી હીરકાન્વિતા ।
શૈવાલમઞ્જરીહસ્તા મઞ્જુલા મઞ્જુલાપિની ॥। ૫૮॥

કવરીકેશવિન્યાસા મન્દહાસમનોરથા ।
મધુરાલાપસન્તોષા કૌબેરી દુર્ગમાલિકા ॥ ૫૯॥

ઇન્દિરા પરમશ્રીકા સુશ્રીઃ શૈશવશોભિતા ।
શમીવૃક્ષાશ્રયા શ્રેણી શમિનો શાન્તિદા શમા ॥ ૬૦॥

કુઞ્જેશ્વરી કુઞ્જગેહા કુઞ્જગા કુઞ્જદેવતા ।
કલવિઙ્કુલપ્રીતા પાદાઙ્ગુલિવિભૂષિતા ॥ ૬૧॥

વસુદા વસુપત્ની ચ વીરસૂર્વીરવર્દ્ધિની ।
સપ્તશૃઙ્ગકૃતસ્થાના કૃષ્ણા કૃષ્ણપ્રિયા પ્રિયા ॥ ૬૨॥

ગોપીજનગણોત્સાહા ગોપગોપાલમણ્ડિતા ।
ગોવર્દ્ધનધરા ગોપી ગોધનપ્રણયાશ્રયા ॥ ૬૩॥

દધિવિક્રયકર્ત્રી ચ દાનલીલાવિશારદા ।
વિજના વિજનપ્રીતા વિધિજા વિધુજા વિધા ॥ ૬૪॥

અદ્વૈતા દ્વૈતવિચ્છિન્ના રામતાદામ્યરૂપિણી ।
કૃપારૂપા નિષ્કલઙ્કા કાઞ્ચનાસનસંસ્થિતા ॥ ૬૫॥

મહાર્હરત્નપીઠસ્થા રાજ્યલક્ષ્મી રજોગુણા ।
રક્તિકા રક્તપુષ્પા ચ તામ્બૂલીદલચર્વિણી ॥ ૬૬॥

બિમ્બોષ્ઠી વ્રીડિતા વ્રીડા વનમાલાવિભૂષણા ।
વનમાલૈકમધ્યસ્થા રામદોર્દણ્ડસઙ્ગિની ॥ ૬૭॥

ખણ્ડિતા વિજિતક્રોધા વિપ્રલબ્ધા સમુત્સુકા ।
અશોકવાટિકાદેવી કુઞ્જકાન્તિવિહારિણી ॥ ૬૮॥ var કુન્તકાન્તિ

મૈથિલી મિથિલાકારા મૈથિલૈકહિતપ્રદા ।
વાગ્વતી શૈલજા શિપ્રા મહાકાલવનપ્રિયા ॥ ૬૯॥

રેવા કલ્લોલસુરતા સત્યરૂપા સદાચિતા ।
સભ્યા સભાવતી સુભ્રૂઃ કુરઙ્ગાક્ષી શુભાનના ॥ ૭૦॥

માયાપુરી તથાયોધ્યા રઙ્ગધામનિવાસિની ।
મુગ્ધા મુગ્ધગતિર્મોવા પ્રમોદા પરમોન્નતા ॥ ૭૧॥

કામધેનુઃ કલ્પવલ્લી ચિન્તામણિગૃહાઙ્ગણા ।
હિન્દોલિની મહાકેલિઃ સખીગણવિભૂષિતા ॥ ૭૨॥

સુન્દરી પરમોદારા રામસાન્નિધ્યકારિણી ।
રામાર્દ્ધાઙ્ગા મહાલક્ષ્મીઃ પ્રમોદવનવસિની ॥ ૭૩॥

વિકુણ્ઠાપત્યમુદિતા પરદારપ્રિયાપ્રિયા । var સહજાવરદાપ્રિયા
રામકૈઙ્કુર્યનિરતા જમ્ભજિત્કરવીજિતા ॥ ૭૪॥

કદમ્બકાનનસ્થા ચ કાદમ્બકુલવાસિની ।
કલહંસકુલારાવા રાજહંસગતિપ્રિયા ॥ ૭૫॥

કારણ્ડવકુલોત્સાહા બ્રહ્માદિસુરસંસ્થિતા ।
સરસી સરસીકેલિઃ પમ્પાજલવિનોદિનો ॥ ૭૬॥

કરિણીયૂથમધ્યસ્થા મહાકેલિવિધાયિની ।
જનસ્થાનકૃતોત્સાહા કાઞ્ચનન્ચકુવઞ્ચિતા ॥ ૭૭॥

કાવેરીજલસુસ્નાતા તીર્થસ્નાનકૃતાશ્રયા ।
ગુપ્તમન્ત્રા ગુપ્તગતિર્ગોપ્યા ગોપતિગોપિતા ॥ ૭૮॥

ગમ્ભીરાવર્તનાભિશ્ચ નાનારસબિલમ્બિની ।

શ્ઋઙ્ગારરસસાલમ્બા કાદમ્બામોદમાદિનો ।
કાદમ્બિની પાનમત્તા ઘૂર્ણિતાક્ષી સ્ખલદ્ગતિઃ ॥ ૮૦॥

સુસાધ્યા દુઃખસાધ્યા ચ દમ્ભિની દમ્ભવર્જિતા ।
ગુણાશ્રયા ગુણાકારા કલ્યાણગુણયોગિની ॥ ૮૧॥

સર્વમાઙ્ગલ્યસમ્પન્ના માઙ્ગલ્યા મતવલ્લભા ।
સુખિતાત્મજનિપ્રાણા પ્રાણેશી સર્વચેતના ॥ ૮૨॥

ચૈતન્યરૂપિણો બ્રહ્મરૂપિણી મોદવર્દ્ધિની ।
એકાન્તભક્તસુલભા જયદુર્ગા જયપ્રિયા ॥ ૮૩॥

હરચાપકૃતક્રોધા ભઙ્ગુરોક્ષણદાયિની ।
સ્થિરા સ્થિરગતિઃ સ્થાત્રી સ્થાવરસ્થા વરાશ્રયા ॥ ૮૪॥

સ્થાવરેન્દ્રસુતા ધન્યા ધનિની ધનદાર્ચિતા ।
મહાલક્ષ્મીર્લોકમાતા લોકેશી લોકનાયિકા ॥ ૮૫॥

પ્રપઞ્ચાતીતગુણની પ્રપઞ્ચાતીતવિગ્રહા ।
પરબ્રહ્મસ્વરૂપા ચ નિત્યા ભક્તિસ્વરૂપિણી ॥ ૮૬॥

જ્ઞાનભક્તિસ્વરૂપા ચ જ્ઞાનભક્તિવિવર્દ્ધિની ।
બ્રહ્મસાયુજ્યસાધુશ્ચ રામસાયુજ્યસાધના ॥ ૮૭॥

બ્રહ્માકારા બ્રહ્મમયી બ્રહ્મવિષ્ણુસ્વરૂપિણો ।
મહાધમ્મિલ્લશોભા ચ કવરીકેશપાશિની ॥ ૮૮॥

ચિન્મયાનન્દરૂપા ચ ચિન્મયાનન્દવિગ્રહા ।
કૈવર્તકુલસમ્પત્તિઃ શબરીપરિવારિણી ॥ ૮૯॥

કનકાચલસંસ્થાના ગઙ્ગા ત્રિપથગામિની ।
ત્રિપુટા ત્રિવૃતા વિદ્યા પ્રણવાક્ષરરૂપિણી ॥ ૯૦॥

ગાયત્રી મુનિવિદ્યા ચ સન્ધ્યા પાતકનાશિની ।
સર્વદોષપ્રશમની સર્વકલ્યાણદાયિની ॥ ૯૧॥

રામરામામનોરમ્યા સ્વયલક્ષ્મ્યા સ્વસાક્ષિણી । var સ્વયલક્ષ્યા
અનન્તકોટિનામા ચ અનન્તકોટિરૂપિણી ॥ ૯૨॥

ભૂલીલા રુક્મિણી રાધા રામકેલિવિબોધિની ।
વીરા વૃન્દા પૌર્ણમાસી વિશાખા લલિતા લતા ॥ ૯૩॥

લાવણ્યદા લયાકારા લક્ષ્મીર્લોકાનુબન્ધિની ।
સૃષ્ટિસ્થિતિલયાકારા તુર્યાતુર્યાતિગાવધિઃ ॥ ૯૪॥

દુર્વાસાવરલભ્યા ચ વિચિત્રબલવદ્ધિની ।
રમણી રામરમણી સારાત્સારા પરાત્પરા ॥ ૯૫॥

ઇતિ શ્રીજાનકીદેવ્યાઃ નામસાહસ્રકં સ્તવમ્ ।
નામકર્મપ્રસઙ્ગેન મયા તુભ્યં પ્રકાશિતમ્ ॥ ૯૬॥

ગોપનીયં પ્રયત્નેન ત્રૈલોક્યેઽપ્યતિદુર્લભમ્ ।
સીતાયાઃ શ્રોમહાલક્ષ્મ્યાઃ સદ્યઃ સંતોષદાયકમ્ ॥ ૯૭॥

યઃ પઠેત્પ્રયતો નિત્યં સ સાક્ષાદ્વૈષ્ણવોત્તમઃ ।
નિત્યં ગુરુમુખાલ્લબ્ધ્વા પઠનીયં પ્રયત્નતઃ ॥ ૯૮॥

સર્વસમ્પત્કરં પુણ્યં વૈષ્ણવાનાં સુખપ્રદમ્ ।
કીર્તિદં કાન્તિદં ચૈવ ધનદં સૌભગપ્રદમ્ ॥ ૯૯॥

પ્રમુદ્વનવિહારિણ્યાઃ સીતાયાઃ સુખવર્દ્ધનમ્ ।
રામપ્રિયાયા જાનક્યા નામસાહસ્રકં પરમ્ ॥ ૧૦૦॥

ઇતિ શ્રીમદાદિરામાયણે બ્રહ્મભુશુણ્ડસંવાદે
સીતાનામસાહસ્રકં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૧૪॥

Proofread by Pallasena Narayanaswami ppnswami at gmail.com

---

*sItAsahasranAmastotram from bhuShuNDirAmAya*

pdf was typeset on August 11, 2020

Please send corrections to *sanskrit@cheerful.com*